योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ८५

पञ्चाशीतितमः सर्गः ८५

श्रीराम उवाच ।

अथ किं वीतहव्यः स्वं स्थितं तस्मिन्धरोदरे ।

कथमुद्धृतवान्देहं स संपन्नश्च किं कथम् ।। १

श्रीवसिष्ठ उवाच ।

अनन्तरमनन्तात्म वीतहव्याभिधं मनः ।

स्वमेवात्मचमत्कारमात्रं समवबुद्धवान् ।। २

शार्वस्यास्य गणस्याभूत्प्राग्ज्योतिःस्मरणे स्वयम् ।

इच्छा कदाचित्सकलप्राग्जन्मालोकनोन्मुखी ।। ३

अशेषान्स ददर्शाथ नष्टानष्टान्स्वदेहकान् ।

अनष्टानां ततो मध्यात्तत्तत्कोटरसंस्थितम् ।। ४

यदृच्छयैव प्रोद्धर्तुं देहं तस्याभवन्मतिः ।

अपश्यत्तत्तथा तत्र पङ्के कीटमिव स्थितम् ।। ५

शरीरं वीतहव्याख्यं धराकोटरपीडितम् ।

प्रावृडोघोपनीतं तत्पृष्ठस्थपङ्कमण्डलम् ।। ६

तृणजालावकीर्णत्वग्देहपृष्ठमृदं तथा ।

एतद्दृष्ट्वा महातेजा धराविवरयन्त्रितम् ।। ७

भूयोऽपि चिन्तयामास धिया परमबोधया ।

सर्वसंपीडिताङ्गत्वात्कायो मे प्राणवायुभिः ।। ८

मुक्तश्चलितुमाकर्तुं शक्नोति न मनागपि ।

तज्ज्ञात्वा प्रविशाम्याशु देहमेवं विवस्वतः ।। ९

तदीयः पिङ्गलो देहमुद्धरिष्यति मे ततः ।

अथवा किं ममैतेन शाम्याम्यहमविघ्नतः ।। १०
निर्वामि स्वं पदं यामि कोऽर्थो मे देहलीलया ।
इति संचिन्त्य मनसा वीतहव्यो महामते ।। ११
तूष्णीं स्थित्वा क्षणं भूयश्चिन्तयामास भूतले ।
उपादेयो हि देहस्य न मे त्यागो न संश्रयः ।। १२
यादृशो देहसंत्यागस्तादृशो देहसंश्रयः ।
तद्यावदस्ति देहोऽयं न यावदणुतां गतः ।। १३
तावदेनमुपारुह्य किंचित्प्रविहराम्यहम् ।
पिङ्गलेन शरीरं स्वमुद्धर्तुं तापनं वपुः ।। १४
प्रविशामि नभःसंस्थं मुकुरं प्रतिबिम्बवत् ।
इत्यसौ मुनिरादित्यं विवेशानिलरूपधृक् ।। १५
पुर्यष्टकवपुर्भूत्वा भस्त्राखमिव चानलः ।
भगवान्मुनिरप्येनं हृद्गतं मुनिनायकम् ।। १६
दृष्ट्वासौ चिन्तयन्कार्यं पौर्वापर्यमुदारधीः ।
विन्ध्यभूधरभूकोशमन्तर्मुनिकलेवरम् ।। १७
तृणोपलपरिच्छन्नं ददर्श गतसंविदम् ।
ऋषेश्चिकीर्षितं ज्ञात्वा भानुर्गगनमध्यगः ।। १८
धरातो मुनिमुद्धर्तुमादिदेशाग्रगं गणम् ।
वीतहव्यमुनेः संवित्सा पुर्यष्टकरूपिणी ।। १९
रविं वातमयी पूज्यं प्रणनामाशु चेतसा ।
भानुनाप्यभ्यनुज्ञातो मानपूर्वकमग्रगम् ।। २०
विवेश पिङ्गलाकारं विन्ध्यकन्दरगामिनम् ।
पिङ्गलोऽसौ नभस्त्यक्त्वा कुञ्जकुञ्जरसुन्दरम् ।। २१
प्राप विन्ध्यवनं प्रावृण्मत्ताभ्राम्बरभासुरम् ।
उद्दधार धराकोशान्नखनिष्कृष्टभूतलः ।। २२
कलेवरं मुनेः पङ्कान्मृणालमिव सारसः ।

मौनं पुर्यष्टकमथ स्वं विवेश कलेवरम् ।। २३

नभस्तलपरिभ्रान्तो विहङ्गम इवालयम् ।

प्रणेमतुर्मिथो मूर्तवीतहव्यनभश्चरौ ।। २४

बभूवतुः स्वकार्यैकतत्परौ तेजसां निधी ।

जगाम पिङ्गलो व्योम मुनिश्च विमलं सरः ।। २५

तारकाकारकुमुदं सूर्यांशुकवदाकृति ।

वीतहव्यो ममज्जाशु सरस्युद्भिन्नपङ्कजे ।। २६

पङ्कपल्वललीलान्ते वने कलभको यथा ।

तत्र स्नात्वा जपं कृत्वा पूजयित्वा दिवाकरम् ।

मनोभूषितया तन्वा पूर्ववत्पुनराबभौ ।। २७

मैत्र्या तया समतया परया च शान्त्या

सत्प्रज्ञया मुदितया कृपया श्रिया च ।

युक्तो मुनिः सकलसङ्गविमुक्तचेता

विन्ध्ये सरित्तटगतो दिनमेव रेमे ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे वीतहव्यसमाधियोगोपदेशो नाम पञ्चाशीतितमःसर्गः ८५